IJETIR
ISSN (Online) 2583-0554
International Journal of Emerging Technologies and Innovative Research (IJETIR)
Volume 4, Issue 8, August 2024
Impact Factor: 5.731

# पण्डितराजजगन्नाथप्रतिपादितदिशा उपमाशाब्दबोधः

डॉ. अमरेन्द्रकुमारमिश्रः

सहाचार्य:, साहित्यविभागः

कालियाचक विक्रमकिशोर आदर्श संस्कृत महाविद्यालय पूर्वमेदिनीपुरम् पश्चिम बंगः

प्राक्कालादेव संस्कृतकाव्यालङ्कारक्षेत्रे "काव्यशोभाकरान्धर्मालङ्कारान्प्रचक्षते " इति प्रसिद्धो वर्तते । काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोः कृते व्यवहतो दृश्यते शब्दार्थशोभासम्पादकाः पदार्थविशेषा एव अलंकाराः अलंक्रियते अनेनेति व्युत्पत्यर्थका अलंकाराः विविधयमत्कारकारकाः भवन्ति । विविधत्वमत्र प्रकाराश्रितम्, प्रकारञ्च शब्दर्थोभयत्वेन द्विविधः सन् अनुप्रासोपमादिभेदैः बहुविधाः भवन्ति । अलंकाराणामेतेषां परिज्ञानं तु काव्ये शब्दादेव जायते शब्दाज्जायमानः अलंकाराणां बोधीऽयं क्वचिदभिधया जायते क्वचिच लक्षणया ।

तत्र शब्दालङ्काराणां शाब्दबोधस्त्वभिधयैवेति निक्षप्रचम्, परश्चार्थालङ्काराणां शाब्दयीचे तु प्रक्रियाद्वयमङ्गीक्रियते आचार्यैः ।

समानरूपेण पदोपन्यासेऽपि शाब्दबोधे वक्त्रारादि वैशिष्ठ्यात् किमपि वैलक्षण्यं प्राय अनुभूयते, तत्र पदानां क्वचित् उद्देश्य प्रतिनिर्देशभावेन वैलक्षण्यं, क्वचित् समासगतबोधेन, कचिद् विशेषण-विशेष्यभाववैशिष्ट्येन क्वचिद् वृत्तिवैलक्षण्येन बहुविध शाब्दबोधवैलक्षण्यं दृष्टिगोचरं भवति । अलंकारशाब्दबोधविषये अनेके नियमा अपि शास्त्रकारैः दर्शिताः । अभिधया प्रतिपादितार्थानां लक्षणया प्रतिपादितार्थानां च शाब्दबोधे भिन्नतयानैकेनियमाः दर्शिताः ।

अभिधया शाब्दबोधे पदार्थोपस्थितिशाब्दबोधयो समानाकारत्वेन यत्प्रकारयद्विशेष्यकपदार्थोपस्थितिः, तत्प्रकारकतत्विशेष्यकशाब्दबोधो जायते। लक्षणायां तु तदन्यप्रकारकतद् विशेष्यकपदार्थोपस्थितिः तथा च संसगीत्मकः शाब्दबोधो भवति ।

IJETIR
ISSN (Online) 2583-0554
IJETIR
Impact Factor: 5.731
International Journal of Emerging Technologies and Innovative Research (IJETIR)
Volume 4, Issue 8, August 2024

अरबिन्द सुन्दरमित्यादावुपमाशाब्दबो धनिरूपणात्पाक् पण्डितराजाभिमतमुपमा स्वरूपप्रतिपादनमावश्यकमिति, तन्निरूप्यते मया-

"सादृश्यं सुन्दरं वाक्यार्थोपस्कारकमुपमालंकृति: " अर्थात् वाक्यार्थोपस्कारकं सुन्दरं सादृश्यम् उपमालंकृतिरित्यन्वयः ।

अरविन्दसुन्दरमित्यत्र २ – निपातातिरिक्तनामार्थयो अरविन्दसुन्दरयोरभेदनैवान्वयस्य व्युत्पन्नत्वात् अरविन्दभिन्नसुन्दरपदार्थशाब्दबोधे नास्ति अभीष्टसिद्धिः । अतः अरविन्दपदेन लक्षणया अरविन्दनिरूपतिसादढश्यप्रयोजकं लक्ष्यते। अरविन्दनिरूपितसादृश्यप्रयोजकस्य सुन्दरपदार्थकदेशे सौन्दर्ये अभदेनान्वय अभीष्यते । अरविन्द सुन्दरमित्यत्र एकदेशान्वयः कथञ्चिदभ्युपेयः । यथा देवदत्तस्य नतेत्यादी, तस्मात् " पदार्थः पदार्थेनान्वेति न पदार्थैकदेशेन " इति न्यायः अत्र प्रतिवध्यते। अतः अरविन्दसुन्दरमित्यत्र अरविन्दनिरूपितसादृश्यप्रयोजकसौन्दर्यवदभिन्नमुखमिति शाब्दबोधो जायते ।

अरविन्दमिव सुन्दरम् - इत्यस्मिन् वाक्ये लक्षणां विनैव केवलं संसर्गतः शाब्दबोधो भवति । अरविन्दस्य निरूपितत्वसंसर्गेण इवार्थे सादृश्ये इवार्थस्य प्रयोजकतासंसर्गेण सौन्दर्ये एवञ्च अरविन्दनिरूपतिसादृश्यप्रयोजकसौन्दर्यवदभिन्नमिति शाब्दबोधः ।

" अरविन्दमिव४" इत्यत्र अरविन्दमिति नामार्थस्य सुविभक्तिजन्योपस्थितौ विशेष्यतायां प्रकारतया बोधएव न्यायसिद्धः अतः अरविन्दनिरूपितसादृश्यवद् मुखमिति शाब्दमिति शाब्दबोधो भवति । अरविन्दमिव भाति ५ - अरविन्दमिव भातीत्यत्र अरविन्दनिरूपितसादृश्यस्य विशेष्यतासंबन्धेन धात्वर्थेऽन्वयः अतः अरविन्दसादृश्यप्रकारकधीविशेष्यकशाब्दबोधो जायते ।

अरविन्दतुल्यो भाति इत्यत्र धातोरेव अरविन्दनिरूपिततुल्यत्वप्रकारकाभिन्नं भानमिति लक्षणया शाब्दबोधः स्वीक्रियते । अरविन्दतुल्यपदस्य तात्पर्यग्राहकता स्वीकरणीया।

IJETIR ISSN (Online) 2583-0554

International Journal of Emerging Technologies and Innovative Research (IJETIR)

Volume 4, Issue 8, August 2024

IJETIR
Impact Factor: 5.731

अरविन्दवत् सुन्दरम् - अरविन्दवत् सुन्दरमित्यत्र “तेन तुल्यं क्रिया चेद्वति" इति वतेः सादृश्यवदर्थकस्य सादृश्ये लक्षणा, तस्य सादृश्यस्य प्रयोजकता संबन्धेन सुन्दरपदार्थैकदेशेन सौन्दर्येणान्वयात् अरविन्दनिरूपितसादृश्यप्रयोजक सौन्दर्यवदभिन्नमिति, अरविन्दमिव सुन्दरमित्यस्यैव शाब्दबोधो भवति । इवादिस्थले शक्त्यैव वतिस्थले लक्षणया सादृश्यबोध इति, उभयोः पार्थक्यम् । अरविन्दवन्मुखम् – अरविन्दवन्मुखमित्यत्र वतेः सादृश्यवति शक्तिरेव तस्याभेदेन मुखार्थेनः सहाऽन्वयः, अतः अरविन्दनिरूपितसादृश्यवदभिन्नमुखमिति शक्त्यैव शाब्दबोधो जायते ।

अरविन्दवद् सौन्दर्यमस्य - अत्रारविन्दशब्दस्य अरविन्दसौन्दर्ये लक्षणा अस्त्येत्यत्र सम्बन्धे षष्ठी। अतः अरविन्दसौन्दर्यनिरूपितसादृश्याधिकरणमेतत्सम्बन्धिसौन्दर्यमिति शाब्दवोधो जायते । अरविन्देन तुल्यम् १० अत्र तृतीयायाः निरूपितत्वमर्थः, तस्य सादृश्येऽन्वयात अतः अरविन्दनिरूपित्तसादृश्याश्रयाभिन्नमिति शाब्दबोधो भवति ।

अरविन्दमाननं च समम्" · इत्यत्र सादृश्यवदित्यर्थे शब्दाज्जाते सादृश्यवदभिन्नमिति शाब्दबोधः, पश्चादरविन्दनिरूपितसादृश्यस्यानने आननिरूपितसादृश्यस्य अरविन्दे च व्यंजनया प्रतीतिर्भवति । अथवा प्रसिद्धोपमाननिरूपितसादृश्यप्रतीतिरूपमेयेऽपि भवितुं शक्नोति । बिम्बप्रतिबिम्बभावापन्नुपमास्थले

३ रसगंगाधर गुरुमप्रकाश पृष्ठ १४०

४ रसगंगाधर गुरुमप्रकाश पृष्ठ १४०

५ रसगंगाधर गुरुमप्रकाश पृष्ठ १४८

६. रसगंगाधर गुरुमप्रकाश पृष्ठ १५०

७] रसगंगाधर गुरुमर्मप्रकाश पृष्ठ १५१.

८. रसगंगाधर गुरुमंत्रकाश १५२

९ रसगंगाधर गुरुप्रकाश पृष्ठ १५२

१० गुरु १५२

शाब्दबोधं प्रदर्शनार्थं पण्डितराजः श्लोकमिममुपस्थापति । तद्यथा -

"कोमलातपशोणाभ्रसन्ध्याकालसहोदरः ।

काषायवसनो याति कुछ कुमालेपनो यतिः ।। १२

अत्र कुछ कुमालेपनेन काषायवसनविशिष्टो यतिः, कोमलातपशोणाश्रविशिष्टसंध्याकालसदृशाभिन्न इति शक्त्या शाब्दबोधो जायते । प्रस्तुतस्थले सादृश्यप्रयोजको धर्मः क इति प्रसङ्गे कथयति - कोमलातपकुङ् कुमालपेनयोः शोणाभ्रकाषायवसनयोः कल्पितविम्बप्रतिबिम्बभावापन्नयोरूपमानोपमेय विशेषणयोस्तादात्म्याध्यवसानेन साधारणत्वनिश्पत्तिर्भवति, तदनन्तरं संध्याकालनिरूपित-कोमलातपशोणाश्रभिन्न कुङ्कुमालेपकाषायवसनाभिन्नसाधारणधर्मप्रयोजक साद्दयवदभिन्नो यतिरिति शाब्दबोधः ।।

इत्थं मया पण्डितराजनगन्नाथप्रतिपादितदिशा उपमाशाब्दबोधः सहजेनोपस्थापितः । पण्डितराजार्थावगतौ प्रक्रियाश्रयणे च स्यादत्र काचित् त्रुटि: सा भवद्भिः क्षन्तव्येति ।